श्री नीलकंठ स्तवः (श्री पार्वतीवल्लभाष्टकं)

श्री नीलकंठ स्तवः (श्री पार्वतीवल्लभाष्टकं)

नमो भूतनाथं नमो देवदेवं
नमः कालकालं नमो दिव्यतेजं |
नमः कामभस्मं नमः शांतशीलं
भजे पार्वतीवल्लभं नीलकंठं || 1 ||

सदा तीर्थसिद्धं सदा भक्तरक्षं
सदा शैवपूज्यं सदा शुभ्रभस्मं |
सदा ध्यानयुक्तं सदा ज्ञानतल्पं
भजे पार्वतीवल्लभं नीलकंठं || 2 ||

श्मशाने शयानं महास्थानवासं
शरीरं गजानां सदा चर्मवेष्टं |
पिशाचादिनाथं पशूनां प्रतिष्ठं
भजे पार्वतीवल्लभं नीलकंठं || 3 ||

फणीनागकंठे भुजंगाद्यनेकं
गळे रुंडमालं महावीर शूरं |
कटिव्याघ्रचर्मं चिताभस्मलेपं
भजे पार्वतीवल्लभं नीलकंठं || 4 ||

शिरः शुद्धगंगा शिवा वामभागं
वियद्दीर्घकेशं सदा मां त्रिणेत्रं |
फणीनागकर्णं सदा फालचंद्रं
भजे पार्वतीवल्लभं नीलकंठं || 5 ||

करे शूलधारं महाकष्टनाशं
सुरेशं परेशं महेशं जनेशं |
धनेशामरेशं ध्वजेशं गिरीशं [धनेशस्यमित्रं]
भजे पार्वतीवल्लभं नीलकंठं || 6 ||

उदासं सुदासं सुकैलासवासं
धरानिर्झरे संस्थितं ह्यादिदेवं |
अजं हेमकल्पद्रुमं कल्पसेव्यं
भजे पार्वतीवल्लभं नीलकंठं || 7 ||

मुनीनां वरेण्यं गुणं रूपवर्णं
द्विजैः संपठंतं शिवं वेदशास्त्रं |
अहो दीनवत्सं कृपालुं शिवं तं
भजे पार्वतीवल्लभं नीलकंठं || 8 ||

सदा भावनाथं सदा सेव्यमानं
सदा भक्तिदेवं सदा पूज्यमानं |
महातीर्थवासं सदा सेव्यमेकं
भजे पार्वतीवल्लभं नीलकंठं || 9 ||

इति श्रीमच्छंकरयोगींद्र विरचितं पार्वतीवल्लभाष्टकं नाम नीलकंठ स्तवः ||